संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः।” साङ्ख्यकारिका। “तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्म्माशयप्रचयोदग्धबीजभावतया न जात्याद्युपभोगलक्षणाय फलाय कल्पते। क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्मबीजान्यङ्कुरं प्रसुवते तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुतः कर्मबीजानामङ्कुरप्रसवः। तदिदमुक्तं धर्म्मादीनामकारणप्राप्ताविति अकारणत्वप्राप्तावित्यर्थः। उत्पन्नतत्त्वज्ञानेऽपि च संस्कारवशात्तिष्ठति। यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमत्तिष्ठति। कालपरिपाकवशादुपरते संस्कारे निष्क्रियं भवति। शरीरस्थितौ च प्रारब्धपरिपाकौ धर्म्माधर्म्मौ संस्कारौ। तथाच श्रूयते “भोगेन त्वितरे क्षपयित्वाथ सम्पद्यत” इति “तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये” इति। प्रक्षीयमाणाविद्याविशेषश्च संस्कारस्तद्वशात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति” तत्त्वकौ०।

सां०सू० भाष्येऽप्युक्तं यथा

“बाधितानुवृत्त्या मध्यविवेकतोऽप्युपभोगः” सू०। “सकृत् सम्प्रज्ञातयोगेनात्मसाक्षात्कारोत्तरं मध्यविवेकावस्थो मध्यमविवेकेऽपि सति पुरुषे बाधितानामपि दुःखादीनां प्रारब्धवशात् प्रतिबिम्बरूपेण पुरुषेऽनुवृत्त्या भोगो भवतीत्यर्थः। विवेकनिष्पत्तिश्चापुनरुत्थानादसम्प्रज्ञातादेव भवतीत्यतस्तस्यां सत्यां न भोगोऽस्तीति प्रतिपादयितुं मध्यविवेकत इत्युक्तम्। मन्दविवेकस्तु साक्षात्कारात् पूर्वं श्रवणमननध्यानमात्ररूप इति विभागः” भा०।

जीवन्मुक्तश्च सू०।

“जीवन्मुक्तोऽपि मध्यविवेकावस्थ एव भवतीत्यर्थः। जीवन्मुक्ते प्रमाणमाह” भा०।

“उपदेश्योपदेष्टृत्वात् तत्सिद्धिः” सू०।

“शास्त्रेषु विवेकविषये गुरुशिष्यभावश्रवणाज्जीवन्मुक्तसिद्धिरित्यर्थः। जीवन्मुक्तस्यैवोपदेष्टृत्वसम्भवादिति” भा०।

“श्रुतिश्च” सू०।

“श्रुतिश्च जीवन्मुक्तेऽस्ति “दीक्षयैव नरो मुच्येत् तिष्ठेन्मुक्तोऽपि विग्रहे। कुलालचक्रमध्यस्थो विच्छिन्नोऽपि भ्रमेद्घटः”। “ब्रह्मैव सन् ब्रह्माप्येतीत्यादि” रिति। नारदीयस्मृतिरपि “पूर्वाभ्यासबलात् कार्य्यं न लोको न च वैदिकः। अपुण्यपापः सर्वात्मा जीवन्मुक्तः स उच्यते”। इति। ननु श्रवणमात्रेणाप्युपदेष्टृत्वं स्यात् तत्राह” साङ्ख्यप्रवचनभाष्यम्।

“इतरथान्धपरम्परा”। सू०।

“इतरथा मन्दविवेकस्याप्युपदेष्टृत्वेऽन्धपरम्परापत्तिरित्यर्थः। सामग्र्येणात्मतत्त्वमज्ञात्वा चेदुपदिशेत् कश्चित् कश्चिदंशे स्वभ्रमेण शिष्यमपि भ्रान्तीकुर्य्यात् सोऽप्यन्यं सोऽप्यन्यमित्येवमन्धपरम्परेति। ननु ज्ञानेन कर्मक्षये सति कथं जीवनं स्यात् तत्राह” भा०

“चक्रभ्रमणवद्धृतशरीरः”। सू०

“कुलालकर्मनिवृत्तावपि पूर्वकर्मवेगात् स्वयमेव यथा कियत्कालं चक्रं भ्रमति। एवं ज्ञानोत्तरं कर्मानुत्पत्तावपि प्रारब्धकर्मवेगेन चेष्टमानं शरीरं धृत्वा जीवन्मुक्तस्तिष्ठतीत्यर्थः। ननु ज्ञानहेतुसम्प्रज्ञातयोगेन भोगादिवासनाक्षये कथं शरीरधारणम्। न च योगस्य संस्काराभिभावकत्वे किं मानमिति वाच्यम्। “व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधपरिणाम” इति योगसूत्रतस्तत्सिद्धेः। चिरकालीनस्य विषयान्तरावेशस्य विषयान्तरसंस्काराभिभावकतया लोकेऽप्यनुभवाच्चेति तत्राह।” भा०

“संस्कारलेशतस्तत्सिद्धिः।” सू०

“शरीरधारणहेतवो ये विषयसंस्कारास्तेषामल्पावशेषात् तस्य शरीरधारणस्य सिद्धिरित्यर्थः। अत्र चाविद्यासंस्कारलेशस्य सत्ता नापेक्ष्यते अविद्याया जन्मादिरूपकर्मविपाकारम्भमात्रे हेतुत्वात्। योगभाष्ये व्यासैस्तथा व्याख्यातत्वात्। “वीतरागजन्मादर्शनादिति” न्यायाच्च। न तु प्रारब्धफलककर्मभोगेऽपीति। यत्र च नियमेनाविद्यापेक्ष्यते स प्रयासविशेषरूपो भोगो मूढेष्वेवास्ति जीवन्मुक्तानां तु भोगाभास एवेति प्रागुक्तम्। यत् तु कश्चिदविद्यासंस्कारलेशोऽपि जीवन्मुक्तस्य तिष्ठतीत्याह तन्न धर्म्माधर्म्मोत्पत्तिप्रसङ्गात्। अन्धपरम्पराप्रसङ्गात्। अविद्यासंस्कारलेशसत्ताकल्पने प्रयोजनाभावाच्च। एतच्च ब्रह्ममीमांसाभाष्ये प्रपञ्चितमिति” भा०।

**जीवन्मुक्ति** स्त्री जीवतो मुक्तिः। जीवतो बन्धनिवृत्तौ जीवतः पुरुषस्य कर्त्तृत्वभोक्तृत्वनिबन्धनसुखदुःखविशेषक्लेशादिरूपस्य निवृत्तौ। तस्या उपायास्तु श्रवणमननयोगाभ्यासादयः तन्त्रोक्तकुलाचाराश्च। “जीवन्मुक्तावुपायस्तु कुलमार्गो हि नापरः” इति तन्त्रोक्तेः।

**जीवन्मृत** त्रि० जीवन्नेव मृतः मृततुल्यः। जीवता कर्त्तव्यकार्य्यस्याकारणात् मृतसमे आत्मम्भरौ स हि जीवन्नपि वैश्वदेवातिथिभोजनाद्यन्तरेण आत्मनः पोषणेन नित्यका-